Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences ISSN: 2581-6241 Volume - 3, Issue - 2, Mar-Apr – 2020
Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 26/02/2020 Accepted on : 05/03/2020 Publication Date: 31/03/2020

# मालविकाग्निमित्रे मालविकायां योगदानमं

**Dr. SUJATHA RAGHAVAN**
Assistant Professor in Sahitya, Dept. of Sanskrit and Indian culture,
SCSVMV University, Enathur, Kanchipuram. Pin: 631561.
Email id: drsujatharaghavan@gmail.com

**सारांश :** मालविकाग्निमित्रनाटकं कालिदासस्य प्रथमकृतित्वेन प्रसिद्धमं। युवराजः अग्निमित्रनायको धीरोदात्तप्रकृतिको तथा धीरललितागुणसम्मन्न नायिका च मालविकाऽख्या विदर्भराज कन्या प्रतिभाति। अत्र हि कविरत्नप्रणीतापेक्षया तथा सिद्धहस्तस्तथापि कालिदास एव। लघुकाव्येऽस्मिन्नाटके विदर्भराजदुहितुर्मालविकायाः मालवेन्द्रेण सह प्रणयस्य कथामनोहरया शैल्योपनिबद्धा नाट्यकलाप्रदर्शनाय रङ्गमवतीर्णाय मालविकया वर्णन् कविना नाट्यशासात्ररहस्यज्ञानमपि प्रकटीकृतमं। नाटकेस्मिन् पञ्चाङ्काः भवति। मालविकाग्निमित्रनाटके मालविख्यां योगधानं कथम् आसीतीति प्रस्तोतुं प्रयत्नं करोमि।

मालविकाग्निमित्रनाटकं कालिदासस्य प्रथमकृतित्वेन प्रसिद्धमं। युवराजः अग्निमित्रनायको धीरोदात्तप्रकृतिको तथा धीरललितागुणसम्मन्न नायिका च मालविकाऽख्या विदर्भराज कन्या प्रतिभाति। अत्र हि कविरत्नप्रणीतापेक्षया तथा सिद्धहस्तस्तथापि कालिदास एव। लघुकाव्येऽस्मिन्नाटके विदर्भराजदुहितुर्मालविकायाः मालवेन्द्रेण सह प्रणयस्य कथामनोहरया शैल्योपनिबद्धा नाट्यकलाप्रदर्शनाय रङ्गमवतीर्णाय मालविकया वर्णन् कविना नाट्यशासात्ररहस्यज्ञानमपि प्रकटीकृतमं। नाटकेस्मिन् पञ्चाङ्काः भवति। मालविकाग्निमित्रनाटके मालविख्यां योगधानं कथम् आसीतीति प्रस्तोतुं प्रयत्नं करोमि।

नाटकेस्मिम् मालविका सरलस्वभावा, पवित्रा, आचरणयुक्ता राजकुमारी आसीतं। विदर्भराजा माधवसेनस्य भगिनि आसीतं। तथा राजा अग्निमित्रस्य भाविपत्नि भविष्यति। तस्याः शिक्षासम्बन्धे नाटके कुत्रीपि संकेतो न भवति तथापि तस्याः वार्तालापं तथा सम्पूर्णव्यवहारेण सा ज्ञायते एव शिक्षितायुक्ता नारीतीति। नाटके मालविका नायिकानां विशिष्ठ संज्ञाषु मुग्धा नायिकायाः परिचितो।

1. सौन्दर्यवती

मालविकायाः सौन्दर्यं अपूर्वमासीतं। कौमुदिका वकुलावलिकायां कृते उक्तवती
आकृतिविशेषाष्वादरः पदं करोति।1
आत्राभिप्रायेण अस्यां(मालाविका) सोन्दर्यं प्रतिभाति। पुनः आर्यगणदासः अस्यां प्रशंसायाम् उक्तिरपि-
आकिवशेषप्रत्ययादेनामनूनवस्तुकां संभावयामि।2
अनेन उक्त्याः आकृतिविशेषं दृष्ट्वापि रमणीयरूप विश्वासात् एवां मालविकां सुविशिष्ठपृष्यां इति मन्ये। तदर्थं
पात्रविशेष न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः।
जलमिव समुद्रसुक्तौ मुक्तफलतां पयोदस्य।।3

अर्थात् भारतीयधारणानुसारं अनुमीयते स्वाति नक्षत्रलग्ने मेघपतितं जलं यदा शुक्ति मुखे पतति तदा जलं मुक्त तुल्यं भवति स्म। तावत् गणदासस्स शिक्षारूपि जलविन्दुमालवकारूपि शक्तायां मुखे पतित्वा मुक्ततुल्यं ज्वलति स्म। अनेन अपूर्वमस्याः सौन्दर्यं प्रतिभाति।
पुनः राज्ञः विदूषकः कृते अस्याः रूप वर्णने आह
चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयमं।
संप्रति शिथिलसमाधिं मन्ये येनयमालिखिता।।4
अनेन श्लोकेन चित्रकलायाः चित्रमुपागतं मालविकायाः सौन्दर्यवैषम्यसंसयान्वितमं। अर्थात् साक्षादागता मलविका चित्रगतमालविकाऽपेक्षया समाधिकालावण्यसमन्विता भूत्वा लोचनं शिशिरयन्ती वर्तते इति व्यज्यते।
पुनः अस्याः सर्वस्थाननवद्यता रूपविशेषे विमोहित्वा राज्ञा कथितमं-
दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहु नतावंसयोः

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241 Volume - 3, Issue - 2, Mar-Apr – 2020
Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 3.589
Received on : 26/02/2020 Accepted on : 05/03/2020 Publication Date: 31/03/2020

संक्षिप्तं निबिडोन्नतस्तनभरः पार्श्वे प्रमृष्टे इव।
मध्यः पाणिमितो नितम्बि जघनं पावरालङ्गुली
छन्दो नर्तयितुर्यथव मनसि श्लिष्टं तथास्याः वपु।।5
पुनः राजा अस्याः चरण वर्णने आह-
चरणान्तनिवेशितां प्रियायाः सरसां पश्य वयस्यरागलेखामं।
प्रथमामिव पल्लवप्रसूर्तिं हरग्धस्य मनोभवद्रुमस्य।।6

2. कुशाग्रबुद्धिः

कुशाग्रबुद्धिः सम्पन्ना राजकुमारी रूपा ख्याता राजकुमारी इयं मालविका। राज्ञः प्रथममहिषीधारिण्याः तस्याः कृते आज्ञापितं-नाट्याचार्यगणदासपश्वि त्वां नृत्यकलायाः शिक्षणं कुरु इति। अस्याः नृत्यकलायां विमुग्ध नाट्याचार्य गणदासः तस्याः प्रशंसा अभिव्यक्ति करोतीति-
यद्त्प्रयोगविषये भाविकमुपिश्यते मया तस्यै।
तत्तद्विशेषकारणद् प्रत्यपदिशतीव मे बाला।।7
तस्याः नृत्यकलायाः तथा संगीत कलायाः अत्यन्त नैपुण्यं दृष्ट्वा आचार्यगणासो सन्तुष्टो अस्ति। तदानीं गणदासः विदूषकः कृते पश्यमेवमेव-
मन्दोऽप्यमन्दतामेति संसर्गेणविपश्चितः।
पङ्कच्छिदः फलस्येव निकषेणाविलं पयः।।8
तत् कलायां विदूषकः तथा परिव्राजिका अत्यन्त प्रशंसितो भवतः। ततः परिव्राजिका उक्त्या-
अङ्गैरनेतर्निहितवचनः सूचितः सम्यगर्थः
पादन्यासो लयमनुगतस्तन्मत्वं रसेषु।
शाखायोनिर्मृदुरभनस्तद्विकल्पानुवृत्तौ
भावो भावं नुदति विषयाद्रागबन्धः स एव।।9
विदूषकः हि-पुनः अस्याः प्रशंसा कृत्वा कथितमं-
भो वयस्य न केवलं रूपे, शिल्पेऽप्यद्वितीया मालविका।10
पुनः राजा कथयति-
अव्याजसुन्दरीं तां विधानेन ललितेन योजयिता।
परिकल्पितो विधात्रा बाणः कामस्य विषदिग्धः।।11
अनेन श्लोकेन दरिदृश्यते सौन्दर्यमतिक्रम्यं काऽपि विशिष्टो पदलभ्यताः नाम अपूर्वासुन्दरीयुक्त। मधुरभाषिणी ललितकलापरिगणिनेति वा इति। नृत्यगीतादि परिचयेन विधानेन योजयिता।
सर्वेरपि हसन्ति तदा मालविका ईषत् हसति तदानीं राजा आह-
स्मयमानमायताक्ष्याः किञ्चिदभिव्यक्तिदशनशोभिमुखमं।
असमग्रलक्ष्यकेसरमुच्छ्वसदिव पङ्कजं दृष्टमं।।12
अस्मिन् श्लोके व्यज्यते। मालविकायाः हासः इति स्मितहासयुक्तम्। अस्याः ईषत् प्रशिदन्तशोभिमुखं तथा विशाललोचनयुक्तमुखं उच्छ्वस् असम्पूर्णदृश्यकिञ्जलकं पङ्कजमिव अवलोकितमं।

3. भयातुरता

मालविका सर्प इत्यादिनां कृते अत्यन्तं भयातुरता आसीत्। विदूषकः यदा उच्चस्वरेण तत्र सर्प सर्प इति कथनेन राजा तस्याः(मालविका) रमणं निमितार्थं यदा बहिरागच्छति तदानीं मालविका अत्यन्त भयेन राज्ञः कृते कथयति तत्र गच्छ एवमेव-भर्तः मा तावत् सहसा निष्क्रम। सर्प इति भण्यते।13
मालविका स्वजीवेने अनेकाः पथे आतङ्किता भवति। अतः दस्युवर्गः इति कर्णपातेण तस्याः शरीरं कम्पनं जायते। दस्युवर्ग्याः चर्यायां सा अयधिकः भयातुरतां आचरति। ततः
मालविका भयं रूपयति।14
अस्याः अवस्थाः परिदृश्य विदूषकः मुखेन पुनः
भवति मा विऊहि। अतिक्रन्तं खलु तत्र भवती कथयति।15

**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** **ISSN: 2581-6241** **Volume - 3, Issue - 2, Mar-Apr – 2020**
**Bi-Monthly, Peer-Reviewed, Refereed, Indexed Journal** **Impact Factor: 3.589**
**Received on : 26/02/2020** **Accepted on : 05/03/2020** **Publication Date: 31/03/2020**

4. अत्यन्तप्रेमयुक्ता

मालविका राज्ञः दर्शनान्तरं तस्मिन्नासक्ता भवति। यथा परभृतिका मधुरिकायाः कृते व्यङ्ग्यतया कथयति-
मालविकाप्येषु दिवसेष्वनुभूतमुक्तेव मालतीमाला म्लाना लक्ष्यते।16इति।
मालविका स्वयमेव प्रलययति एवम-
अविज्ञातहृदयं भर्तारमभलाषन्त्यात्मनोऽपि तावल्लजे। कृतो विभवः स्निग्धस् सखीजनस्येमं
वृत्तान्तमाख्यातुमं। न जानेऽप्रतीकारगुरुकां वेदनां कियन्तं कालं मदनो मां निष्यति।।17
इति विरहवेदनां नाटयति। सा राजानं चिन्तयन् किं कार्यं कर्तव्यमित्येव क्षणे विस्मरति। ततः
हृदय, निरवलम्बनातिभूमिलङ्घिनोते मनोरथाद्विरमं।
किं मामायास्य इत्युक्त्वा कष्टमनुभवति।।18

5. प्रणयकोपयुक्ता

चित्रगतां मामं अदृष्ट्वा राजा किमपि पश्यतीति बकुलावलिकायाः कृते कथयति। तथा हि-
हला! भर्ता अदक्षिण इव मे प्रतिभति। यः सर्वे देवी जनमुज्झित्वैकस्या मुखे बद्दलयः।19
ततः किमिदानीमात्मानमायसयिष्यामि।20 इति सासूयं परावर्तते।

6. विनययुक्ता रहस्यनिगूढा च

इयं सर्वदा विनियुक्ता भवति स्म। देव्या कारागृहे स्थापितापि स्वस्य विनयं न त्यजति। एवं स्वस्य परिचयं कस्मै अपि न प्रकटयति। भतृदारिका चेदपि प्रेष्यभावेनैव कार्यं कृत्वा स्वरहस्यं निगूहति। अहङ्कारं न प्रदर्शयति च। राजा कृते सा अत्यन्तप्रेमरतासीत् यत् बकुलावलिका कथितवति-
एष उपारूढाग उपभोगक्षमः पुरतस्ते वर्तते।21
ततः परं तस्याः मुखं अनायास क्रमेण प्रस्फुटितं भवेत्- किं भर्ता।22इति।

7. शालिनतापूर्णस्वभावा

मालविका नृत्यकलायाः स्वतन्त्रता साहासं तथा न परिलक्ष्यते। रूपदृश्या सा भयेन कातरता स्थिता किन्तु अन्तेः तावत् न भवति। यतो हि स्त्रीणां अलङ्कारं विमण्डते तासां लज्जा एका गुणः। नृत्यपरिक्ष्यां तस्याः भावं प्रदर्शयितुं उच्च कुलसम्पन्ना कन्या परपुरुषसमीपं नृत्यरता भवति।
वामं संधिस्तिमितवलयं न्यस्य हस्तं नितम्बे
कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयमं।
पादाङ्गुष्ठालुलिकुसुमे कुट्टिमे पातिताक्षं
नान्तदस्याः स्थितिमतितरां कान्तमुज्वायतार्धमं।।23
पुनः मालविकया व्याग्रता दृष्ट्वा गणदासः कथयति-
वत्से, मुक्तासाध्वसा सत्त्वस्था भव।24

8. प्रेम तथा भयेन संयुक्ता

मालविका महाराजं अग्निमित्रं प्रेम अवश्यंकरोति महाराज्ञि धारिणीं कृते भीतो अस्ति अनया। भयस्य पुनः द्वे अभवतामं। प्रथमं तावत् यदि तस्याः प्रेमं ज्ञानं भवति तदा सा तत्र भर्सिता भविष्यति। द्वितीयं तु धारिशी तस्याः कृते अददत् कारावासं तस्याः भीत तथा कातरतां जनयति। अतः राजा कृते सा अहति-
देव्या भयेनात्मनोऽपि प्रियं कर्तुं न पारयामि।25
ततः परं राजा उत्तरयति
अचि न भवितव्यमं।26
अत्रेव व्यङ्ग्येन मालविका वचना अभिव्यक्तो भवति। एवमेव-
योन बिभेति स मया भट्टिनीदर्शने दृष्टसामर्थ्यो भर्ता।27
पुनः यदा इरावती पश्यति रीज्ञः सङ्गे तस्याः भ्रमणं तदा सा भीत्वा कथितवति।
देवी चिन्तयित्वा वेपते मे हृदयमं। नजानेऽतः परं किं वाऽनु भवितव्यं भविष्यतीति।28

9. मुग्धानायिका

इयं च मालविका अन्यस्त्री मुग्धा च भवति। तथा च मुग्धायाः लक्षणमाह धनञ्जय-
मुग्धा नववयः कामा रतौ वामा मृदुः क्रधि इति।29
मालविका तावत् नववयोमुग्धा भवति। नाट्यप्रसङ्गे अभिनयप्रदर्शनान्तरं राजा मालविकामुद्दिश्य(आत्मगतं) कथयति-
स्मयानामायताक्ष्याः किंचिदभिव्यक्तदशानशोभिः मुखमं।
असमग्रलक्ष्यकेसरमुच्छ्वसदिव पङ्कजं दृष्टमं।।30
एवं रूपेण काममुग्धापि भवति सा। कोपयुक्तं तां दृष्ट्वा राजा स्वयमेव कथयति-
हस्तं कम्पयते रूणाद्धि श्शनाव्यापारळोलाङ्गुलीः
स्वहस्तौ नयति स्तानावरणतामालिङ्ग्यमानाबलातं।
पातुं पक्ष्मलनेत्रमुन्नमयतः साचीकरोत्याजनमं
व्याजेनाप्याभिलाषपूरणसुखं निर्वर्तयत्येवमे।।31
इयं च कोपे कठोरतां न प्रदर्शयति। चित्रगतो राजा इरावतीं पस्यतीति प्रणयकोपेन प्रदर्शयति। तदन्तरं राजा तां सान्त्वयति। तदा झटित्येव कोपं त्यक्त्वा प्रदर्शयति।
अन्यास्त्रीरियं कन्यकालक्षणयुक्ता भवति। तत्र कन्यानायिका तु-
दशरूपके धनञ्जयेनमाह-
अन्यास्त्री च नान्योदाऽङ्गिरसे क्वचितं।
कन्यानुरागमुच्छतः कुर्यादङ्गिसंश्रयमं।।32
लक्ष्यणोक्त प्रकरेणैव मालविका स्वस्या प्रेम लज्जावशात् स्वसख्याः बकुलवलिकायाः कृते कथयति। राजानमालिङ्गिने कम्पनुभवति। अतः दूरादेव पश्यति। स्वस्याङ्कं नाट्य सव्यपदेशं प्रकाशयति। तदा तदा राजानां चिन्तयित्वा चेष्टाश्च करोति।
इयं नायिकायाः अवस्ता भेदे च अभिसारिकामनुसति। यथा अभिसारिकायाः लक्षणमाहः विश्वनाथैः-
अभिसारयते कान्तं या मन्मथवशेवदा।
रूपं वाऽभिसरप्येषा धीरैरुक्ताभिशारिका।।33
एवं प्रकारेण मालविका चतुर्थाङ्के राज्ञः साकं मेलनं सम्भवति। तत्र मेलनात्पूर्वं बकुलबालिकायाः वाक्यं निश्चिनोति।

**उपसंहारः**

भरतमुनेः प्रणीतः नाट्यशास्त्रविषयो ये ये नियमाः वर्तिताः ते सर्वे अस्य नाटकस्य पात्राणि पराशीलने परिभूयते। मालनिकाग्निमित्रे नारीषु मालविका युक्ता कोऽपि विशिष्यं भजते। लज्जा-भाति-प्रभृति गुणाः मुग्धनायिकासु दृश्यते। नाटकस्य प्रथमोङ्के मालविकायाः चित्रं दृष्ट्वा राजा यथा कामयते ततोधिकमियं राजानं कामयते।एवमेव मालविकाग्निमित्रनाटके मालविख्यां योगधानं आसीतीति शमं।

**उपयुक्तग्रन्धसूचि**

1. मालविकाग्निमित्रमं दृ कालिदासः -चैखम्बा सुरभारती प्रकाशन् वारणासी.
2. मालविकाग्निमित्रमं -कालिदासः - मोतिलाल बनारसीदास
3. साहित्यदर्पणं - विश्वनाथ कविराजः - पङ्कज पब्लिकेषनं
4. दशरूपकं दृ धनञ्जयः दृ चैखाम्बा विद्याभवनं.

---------------------------------------------

**टिप्पणी**

1. मालविकाग्निमित्रमं प्र. अ. 10 पृष्ठाः
2. मालविकाग्निमित्रमं प्र. अ. 14 पृष्ठाः
3. मालविकाग्निमित्रमं प्र. अ. श्लोकः 6
4. मालविकाग्निमित्रमं द्वि. अ. श्लोकः 2
5. मालविकाग्निमित्रमं द्वि. अ. श्लोकः 3
6. मालविकाग्निमित्रमं तृ. अ. श्लोकः 11
7. मालविकाग्निमित्रमं प्र. अ. श्लोकः 5

8. मालविकाग्निमित्रमं द्वि. अ. श्लोकः 7
9. मालविकाग्निमित्रमं द्वि. अ. श्लोकः 8
10. मालविकाग्निमित्रमं द्वि. अ. पृष्ठाः 57
11. मालविकाग्निमित्रमं द्वि. अ. श्लोकः 13 पृष्ठाः 57
12. मालविकाग्निमित्रमं द्वि. अ. श्लोकः 10
13. मालविकाग्निमित्रमं च. अ. पृष्ठाः139
14. मालविकाग्निमित्रमं तृ. अ. पृष्ठाः 96
15. मालविकाग्निमित्रमं प्र. अ. पृष्ठाः167
16. मालविकाग्निमित्रमं तृ. अ. पृष्ठाः 62
17. मालविकाग्निमित्रमं तृ. अ. पृष्ठाः 82
18. मालविकाग्निमित्रमं तृ. अ. पृष्ठाः 77
19. मालविकाग्निमित्रमं च. अ. पृष्ठाः126
20. मालविकाग्निमित्रमं च. अ. पृष्ठाः126
21. मालविकाग्निमित्रमं तृ. अ. पृष्ठाः 92
22. मालविकाग्निमित्रमं तृ. अ. पृष्ठाः 92
23. मालविकाग्निमित्रमं द्वि. अ. श्लोकः 6
24. मालविकाग्निमित्रमं द्वि. अ. पृष्ठाः 44
25. मालविकाग्निमित्रमं च. अ. पृष्ठाः133
26. मालविकाग्निमित्रमं च. अ. पृष्ठाः133
27. मालविकाग्निमित्रमं च. अ. पृष्ठाः133
28. मालविकाग्निमित्रमं च. अ. पृष्ठाः145
29. दशरूपकं द्वि.प्राकशः श्लोकः 16
30. मालविकाग्निमित्रमं द्वि. अ.श्लोकः 10
31. मालविकाग्निमित्रमं च. अ. श्लोकः 15
32. दशरूपकं द्वि.प्राकशः श्लोकः 20
33. साहित्यदर्पणं तृ. परीच्छेदे 73 श्लोकः